कुब्जं इत्यादनीयुक्तं लताच्छन्नं तरुं त्यजेत् ॥
पक्षिवाससमाकीर्णं कोटरैर्बहुभिर्युतम् ।
पवनानलविध्वस्तं तरुं यत्नेन वर्जयेत् ॥
नारीसंज्ञाश्च ये वृक्षा अतिह्रस्वा अतिकृशाः ।
तान् सदा वर्जयेद्धीरः सर्व्वदा शक्रपूजने ॥
अर्ज्जुनोऽप्यश्वकर्णश्च प्रियको धव एव च ।
औडुम्बरश्च पञ्चैते केत्वर्थे सत्तमाः स्मृताः ॥
अन्ये च देवदार्व्वाद्याः शालाद्यास्तरवस्तथा ।
प्रशस्तास्तु परिग्राह्या नाप्रशस्ताः कदाचन ।
तत्र वृक्षं ततो रात्रौ स्पृष्ट्वा मन्त्रमिमं पठेत् ॥
यानि वृक्षे तु भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः ।
उपहारं गृहीत्वेमं क्रियतां वासवध्वजः ॥
पार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम ।
ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम् ॥
ततोपरेऽह्नि तं छित्त्वा मूलमष्टाङ्गुलं पुनः ।
जले क्षिपेत्तदग्रस्य छित्त्वैवं चतुरङ्गुलम् ॥
ततो नीत्वा पुरद्वारं केतुं निर्म्माय तत्र वै ।
शुक्लाष्टम्यां भाद्रपदे केतुं वेदीं प्रवेशयेत् ॥
द्वाविंशद्धस्तमानस्तु अधमः केतुरुच्यते ।
द्वात्रिंशत्तु ततो ज्यायान् द्वाचत्वारिंशदेव च ।
ततोऽधिकः समाख्यातो द्वापञ्चाशत्तथोत्तमः ।
कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य नृपसत्तम ।
शालमय्यस्तु ताः सर्व्वास्त्वपराः शक्रमातृकाः ॥
केतोः पादप्रमाणेन कार्य्याः शक्रकुमारिकाः ॥
मातृकार्द्धप्रमाणात्तु यन्त्रं हस्तद्वयं तथा ।
एवं कृत्वा कुमारीश्च मातृकां केतुमेव च ॥
एकादश्यां सिते पक्षे यष्टिं तामधिवासयेत् ।
अधिवास्य ततो यष्टिं गन्धद्वारादिमन्त्रकैः ॥
द्वादश्यां मण्डलं कृत्वा वासवं विस्तृतात्मकम् ।
अच्युतं पूजयित्वा तु शक्रं पश्चात् प्रपूजयेत् ॥
शक्रस्य प्रतिमां कुर्य्यात् कानकीं दारवीं तथा ।
अन्यतैजसभूतां वा सर्व्वाभावे तु मृण्मयीम् ॥
तां मण्डलस्य मध्ये तु पूजयित्वा विशेषतः ।
ततः शुभे मुहूर्त्ते तु केतुमुत्थापयेन्नृपः ॥
वज्रहस्त सुरारिघ्न बहुनेत्र पुरन्दर ।
क्षेमार्थं सर्व्वलोकानां पूजेयं प्रतिगृह्यताम् ॥

एह्येहि सर्व्वामरसिद्धसंघै-
रभिष्टुतो वज्रधरामरेश ।
समुत्थितस्त्वं श्रवणाद्यपादे
गृहाण पूजां भगवन् नमस्ते ॥

एवमुत्तरतन्त्रोक्तदण्डनर्त्तनादिभिः ।
इति मन्त्रेण तन्त्रेण नानानैवेद्यवेदनैः ॥
आपूपैः पायसैः पानैर्गुडैर्धानाभिरेव च ।
भक्ष्यैर्भोज्यैश्च विविधैः पूजयेत् श्रीविवृद्धये ॥
घटेषु दशदिक्पालान् ग्रहांश्च परिपूजयेत् ।
साध्यादीन् सकलान्देवान् मातृः सर्व्वास्त्वनु-
क्रमात् ॥
ततः शुभे मुहूर्त्ते तु शान्तिवर्द्धकिसंयुतः ।
केतोरुत्थानभूमिन्तु यज्ञवेद्याश्च पश्चिमे ।
विप्रैः पुरोहितैः सार्द्धं गच्छेद्राजा सुमङ्गलैः ॥
रज्जुभिः पञ्चभिर्बद्धं यन्त्रस्थितं समातृकम् ।
कुमारीभिश्च संयुक्तं दिक्पालानाश्च पेटकैः ॥"
पेटकैः स्थाने पट्टकैरिति च पाठः ।
"छत्त्रैरतिकान्तैश्च नानाद्रव्यसुपूरितैः ।
यथावर्णैर्यथादेशयोजितैर्व्वस्त्रवेष्टितैः ॥
युक्तं तं किङ्किणीजालैर्हेमदण्डघण्टौघचामरैः ।
भूषितं बहुरत्नैश्च माल्यैर्बहुविधैस्तथा ॥
बहुपुष्पैः सुगन्धैश्च भूषितं रत्नमालया ।
चित्रमाल्याम्बरधरैश्चतुर्भिरपि तोरणैः ॥
उत्थापयेन्महाकेतुं राजामात्यैः शनैः शनैः ।
तमुत्थाप्य महाकेतुं पूजितं मण्डलान्तरे ॥
प्रतिमां तां नयेन्मूलं केतोः शक्रं विचिन्तयन् ।
यजेत्तं पूर्व्ववत्तत्र शचीं मातलिमेव च ॥
जयन्तं तनयं तस्य वज्रमैरावतं तथा ।
ग्रहांश्चाप्यथ दिक्पालान् सर्व्वांश्च गणदेवताः ॥
अपूपाद्यैः पूजयेत्तु बलिभिः पायसादिभिः ।
पूजितानाश्च देवानां शश्वद्धोमं समाचरेत् ॥
होमान्ते तु बलिं दद्यात् वासवाय महात्मने ॥
तिलं घृतं चाक्षतश्च पुष्पं दूर्व्वां तथैव च ।
एतैस्तु जुहुयाद्देवान् स्वैः स्वैर्मन्त्रैर्नरोत्तमः ॥
ततो होमावसाने तु भोजयेदपि ब्राह्मणान् ।
एवं संपूजयेन्नित्यं सप्तरात्रं दिने दिने ॥
ब्राह्मणैः सहितो राजा वेदवेदाङ्गपारगैः ।
सर्व्वत्र शक्रपूजासु यज्ञेषु परिकीर्त्तितः ॥
त्रातारमिति मन्त्रोऽयं वासवस्य प्रियः सदा ।
एवं कृत्वा दिवाभागे शक्रोत्थापनमादितः ॥
श्रवणर्क्षयुतायान्तु द्वादश्यां पार्थिवः स्वयम् ।
अन्त्यपादे भरण्यास्तु निशि शक्रं विसर्जयेत् ॥
सुप्तेषु सर्व्वलोकेषु यथा राजा न पश्यति ।
वत्सरान्मृत्युमाप्नोति राजा दृष्ट्वा विसर्जनम् ॥
शक्रस्य नृपशार्दूल तस्मान्नेक्षेत तं नृपः ।
विसर्ज्जनस्य मन्त्रोऽयं पुराविद्भिरुदीरितः ॥
सार्द्धं सुरासुरगणैः पुरन्दर शतक्रतो ।
उपहारं गृहीत्वेमं महेन्द्रध्वज गम्यताम् ॥
मृतकेतुसमुत्पन्ने वारे भौमस्य वा शनेः ।
भूमिकम्पादिकोत्पाते वासवं न विसर्जयेत् ॥
उत्पाते सप्तरात्रन्तु तथोपप्लवदर्शने ।
व्यतीत्य शनिभौमौ च ह्यन्यर्क्षेऽपि विसर्ज्जयेत् ॥
मृतके त्वथ संप्राप्ते व्यतीते सूतके पुनः ।
तस्मिंस्तस्मिन् दिने चैव सूतकान्ते विसर्ज्जयेत् ॥
तथा रक्षेन्नृपः केतुं पतन्ति शकुना यथा ।
न केतौ नृपशार्दूल यावन्नपि विसर्जनम् ॥
शनैः शनैः पातयेत्तु यथोत्थापनमादितः ।
कृतं तथान्यथा भग्ने केतौ मृत्युमवाप्नुयात् ॥
विसृष्टं शक्रकेतुं तं सालङ्कारं तथा निशि ।
क्षिपेदनेन मन्त्रेण त्वगाधे सलिले नृपः ॥
तिष्ठ केतो महाभाग यावत् संवत्सरं जले ।
भवाय सर्व्वलोकानामन्तरायविनाशक ॥
उत्थापयेत्तूर्य्यरवैः सर्व्वलोकस्य वै पुरः ।
रहो विसर्जयेत् केतुं विशेषोऽयं प्रपूजने ॥
एवं यः कुरुते पूजां वासवस्य महात्मनः ।
स चिरं पृथिवीं भुक्त्वा वासवं लोकमाप्नुयात् ॥
न तस्य राज्ये दुर्भिक्षं नेतयो नाप्यधर्म्मकृत् ।
स्यास्यन्ति मृत्युर्नाकाले जनानां तत्र जायते ॥
तत्तुल्यः कोऽपि नान्योऽस्ति प्रियः शक्रस्य
पार्थिव ।
तस्य पूजा सर्व्वपूजा केशवाद्याश्च तत्त्वगाः ॥
सकलकलुषहारि व्याधिदुर्भिक्षनाशि
सकलभवनिवेशं सर्व्वसौभाग्यकारि ।
सुरपतिगृहगामीहार्च्चनं शक्रकेतोः
प्रतिशरदमनेकैः पूजयेत् श्रीविवृद्ध्यै ॥"
इति श्रीकालिकापुराणे ८८ अध्यायः ॥

शक्रोत्सवः, पुं, ( शक्रस्योत्सवः । ) इन्द्रस्य उत्सवः । तत्पर्य्यायः । ध्वजोत्थानम् २ । इति त्रिकाण्डशेषः ॥ ( यथा, महाभारते । १ । ६३ । २७ ।
"वरदानमहायज्ञैस्तथा शक्रोत्सवेन च ।
संपूजिता मघवता वसुश्चेदीश्वरो नृपः ॥")
अस्य विवरणं शक्रोत्थानशब्दे द्रष्टव्यम् ॥

शक्लः, पुं, (शक + "मृड्शकवविभ्यः क्लः ।" उणा० ४ । १०८ । इति क्लः । ) प्रियंवदः । इति शक्लशब्दटीकायां भरतः ॥

शकारः, पुं, वृषः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शकरी, स्त्री, ( शक्नोति कर्म्माणि कर्त्तुमिति । शक + "क्वनिप्रदीति ।" उणा० ४ । ११२ । इति वणिप् । "वनो र च ।" ४ । १ । ७ । इति ङीप्रौ । ) अङ्गुली । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ नदीविशेषः । मेखला । छन्दोभेदः । इति मेदिनी ॥ स तु चतुर्द्दशाक्षरपादवृत्तम् । तद्भेदा यथा । असंबाधा १ वसन्ततिलकम् २ सिंहोद्धता ३ अपराजिता ४ प्रहरणकलिका ५ वासन्ती ६ लोला ७ नान्दीमुखी ८ । इति छन्दोमञ्जरी ॥ ( ऋक् । यथा, ऋग्वेदे । १० । ७१ । ११ ।
"ऋचां त्वः पोषमास्ते पुपुष्वान्
गायत्त्रं त्वो गायति शक्वरीषु ॥"* ॥
शक्नोति क्षीरादिप्रदानेन तद्वन्तं प्रीणयितुं स्पर्शनेन वा पापमपनेतुमिति । शक + वनिप् । ङीप्रौ च । गौः । इति निघण्टुः । २ । ११ ॥ )

शक्वा, [न्] पुं, (शक्नोतीति । शक् + "क्वनिप-दीति ।" उणा० ४ । ११२ । इति वनिप् । ) हस्ती । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शङ्कः, पुं, शकटादिवाहकवृषभः । यथा,—
"स्कन्धवाहस्तु शङ्कश्च शृङ्गी गौरश्चधूर्त्तिलः ।"
इति हारावली ॥

शङ्करः, पुं, ( शं कल्याणं करोतीति । शम् + कृ + "शमिधातोः संज्ञायाम् ।" ३ । २ । १४ । इति अच् । ) शिवः । इत्यमरः ॥ अस्य व्युत्पत्तिर्यथा,—
"सदा ध्यानाच्च भक्तानां पवनं यन्निरामयम् ।
भूतनाथत्वमप्यस्मात्तेनाहं शङ्करः स्मृतः ॥"
इति स्कन्दपुराणम् ॥
अस्य भस्मास्थिधारणकारणं यथा,—
"विसृज्य तान् ब्रह्मविष्णुमयान वृषभवाहनः ।
आदाय सगणान् सर्व्वान् कामरूपाम्बरं ययौ ।
उग्रतारां ततो देवीं गणांश्च प्राह शङ्करः